Takshashila Project

।अथ।

॥नैरुक्तनीपोथीपंसाखापाचंदजीनीछै॥

।उत्तरार्द्ध।

Digitized by Vaidika Bharata/Suparna Trust, Maujpur, New Delhi.

१ ॥श्रीगणेशायनमः॥ हरिः ॐ ॥ अथातोदैवतंतद्यानिनामानि
प्राधान्यस्तुतीनांदेवतानांतद्दैवतमित्याचक्षतेसैषादेवतोप
परीक्षायत्काम ऋषिर्यस्यांदेवतायामार्थपत्यमिच्छन्स्तुतिंप्रयुं
क्तेतद्दैवतः समंत्रोभवति॥ तास्त्रिविधाः ऋचः परोक्षकृताः प्र
त्यक्षकृताः आध्यात्मिक्यश्चतत्रपरोक्षकृताः सर्वाभिर्नामवि
भक्तिभिर्युज्यंतेप्रथमपुरुषैश्चाख्यातस्य॥१॥ इंद्रोदिवइंद्र
ईशेपृथिव्याः इंद्रमिद्गाथिनोबृहदिंद्रेणैतेतृत्सवोवेविषाणाः इं १
द्रायसामगायत॥ नेंद्रादृतेपवतेधामकिंचनेंद्रस्यनुवीर्याणि

प्रवोचमिंद्रेकामा अयंसतेत्यथप्रत्यक्षकृतामध्यमपुरुषयो
गास्त्वमितिचैतेनसर्वनाम्ना॥ त्वमिंद्रबलादधि॥ विनइंद्रमृधो
जहीत्यथापिप्रत्यक्षकृताः स्तोतारोभवंतिपरोक्षकृतानिस्तोत
व्यानि॥ माचिदन्यद्विशंसत॥ कण्वा अभिप्रगायतोपप्रेतकुशि
काश्चेतयध्वमित्यथाध्यात्मिक्य उत्तमपुरुषयोगा अहमिति
चैतेनसर्वनाम्ना॥२॥ यथैतदिंद्रोवैकुंठोलवसूक्तंवागांभृणी
यमितिपरोक्षकृताः प्रत्यक्षकृताश्चमंत्राभूयिष्ठाः अल्पशः
आध्यात्मिकाः अथापिस्तुतिरेवभवतिनाशीर्वाद इंद्रस्यनुवी

२ याणिप्रवोचमितियथैतस्मिन्सूक्ते॥ऽथाप्याशीरेवनस्तुतिः।
सुचक्षाऽअहमक्षीभ्यांभूयासंसुवर्चामुखेनसुश्रुत्कर्णाभ्यां
भूयासमितितदेतद्बहुलमाध्वर्यवेयाज्ञेषुचमंत्रेषु॥अथापिश
पथाभिशापौ॥अद्यामुरीययदियातुधानोऽअस्मि॥अधास
वीरैर्दशभिर्वियूयाःइत्यथापिकस्यचिद्भावस्याचिख्यासा॥न
मृत्युरासीदमृतंनतर्हितमऽआसीत्तमसागूल्हमग्रे॥अथापि
परिदेवनाकस्माच्चिद्भावात्॥सुदेवोऽअद्यप्रपतेदनावृत्॥न २
विजानामियदिवेदमस्मीत्यथापिनिंदाप्रशंसे॥केवलाघोभ

वतिकेवलादी॥भोजस्येदंपुष्करिणीववेश्मेत्येवमक्षसूक्तेद्यूत
निंदाचकृषि॥प्रशंसाचैवमुच्चावचैरभिप्रायैर्ऋषीणांमंत्रदृष्ट
योभवंति॥३॥तद्येऽनादिष्टदेवतामंत्रास्तेषुदेवतोपपरीक्षा
यद्देवतःसयज्ञोवायज्ञांगंवातद्देवताभवंत्यथान्यत्रयज्ञात्प्रा
जापत्याऽइतियाज्ञिकानाराशंसाऽइतिनैरुक्ताःअपिवासाका
मदेवतास्यात्प्रायोदेवतावास्तिह्याचारोबहुलंलोकेदेवदेव
त्यमतिथिदेवत्यंपितृदेवत्यंयाज्ञदैवतोमंत्रःइत्यपिह्यदेवता
देवतावस्तूयंतेयथाश्वप्रभृतीन्योषधिपर्यंतानि॥४॥अथाप्य

Digitized by Vaidika Bharata/Suparna Trust, Maujpur, New Delhi.

२ शेषोहंह्यनिसन्नमन्येतागंतून्निवार्थानांदेवतानांप्रत्यक्षदृश्यमे
तद्भवतिमाहाभाग्याद्देवतायाःऽएकःऽआत्माबहुधास्तूयतेऽए
कस्यात्मनोन्येदेवाः प्रत्यंगानिभवंत्यपिचसत्वानांप्रकृतिभू
मभिःऽऋषयःस्तुवंतीत्याहुःप्रकृतिःसार्वनाम्न्याच्चेतरेतरज
न्मानोभवंतीतरेतरप्रकृतयःकर्मजन्मानःऽआत्मजन्मानः
आत्मैवैषांरथोभवत्यात्माश्वाऽआत्मायुधमात्मेषवःऽआत्मा
सर्वंदेवस्यदेवस्य॥५॥सप्तमस्यप्रथमःपादः॥ ॥१॥तिस्रःऽए ३
वदेवताऽइतिनैरुक्ताःऽअग्निःपृथिवीस्थानोवायुर्वेंद्रोवांत

रिक्षस्थानःसूर्योद्युस्थानस्तासांमाहाभाग्यादेकैकस्याःऽअपि
बहूनिनामधेयानिभवंत्यपिवाकर्मपृथक्त्वाद्यथाहोताध्वर्युर्ब्र
ह्मोद्गातेत्यप्येकस्यसतोपिवापृथगेवस्युःपृथग्धिस्तुतयोभवं
तितथाभिधानानियथोऽएतत्कर्मपृथक्त्वादितिबहवोपिविभ
ज्यकर्माणिकुर्युस्तत्रसंस्थानैकत्वंसंभोगैकत्वंचोपेक्षितव्यंय
थापृथिव्यांमनुष्याःपशवोदेवाःऽइतिस्थानैकत्वंसंभोगैकत्वंच
दृश्यतेयथापृथिव्याःपर्जन्येनचवाय्वादित्याभ्यांचसंभोगोग्निना
चेतरस्यलोकस्यतत्रैतंनरराष्ट्रमिव॥१॥६॥ऽअथाकारचिन्तनं

५ देवतानांपुरुषविधास्युरित्येकंचेतनावद्वद्धिस्तुतयोभवंतित
थाभिधानान्यथापिपौरुषविधिकैरंगैःसंस्तूयंते॥ऋष्वातऽइंद्र
स्थविरस्यबाहूयत्संगृभ्णामघवन्काशिरित्ते॥अथापिपौरुष
विधिकैर्द्रव्यसंयोगैः॥आद्वाभ्यांहरिभ्यामिंद्रयाहि॥कल्याणीर्जा
यासुरणंगृहेते॥अथापिपौरुषविधिकैःकर्मभिः॥अद्धीद्रपिब
चप्रस्थितस्य॥आश्रुत्कर्णश्रुधीहवं॥७॥अपुरुषविधास्युरि
त्यपरमपितुयद्दृश्यतेपुरुषविधंतद्यथाग्निर्वायुरादित्यःपृथि ५
वीचंद्रमाऽइतियथोऽएतच्चेतनावद्वद्धिस्तुतयोभवंतीत्यचे

तनान्यप्येवंस्तूयंतेयथाक्षप्रभृतीन्योषधिपर्यंतानियथोऽए
तत्पौरुषविधिकैरंगैःसंस्तूयंतऽइत्यचेतनेष्वप्येतद्भवत्यभि
क्रंदंतिहरितेभिरासभिरितिग्रावस्तुतिर्यथोऽएतत्पौरुषविधि
कैर्द्रव्यसंयोगैरित्येतदपितादृशमेवसुखंरथंयुयुजेसिंधुर
श्विनमितिनदीस्तुतिर्यथोऽएतत्पौरुषविधिकैःकर्मभिरित्येत
दपितादृशमेवहोतुश्चित्पूर्वेहविरद्यमाशतेतिग्रावस्तुतिरेवा
पिवोभयविधास्युरपिवापुरुषविधानामेवसतांकर्मात्मान
ऽएतेस्युर्यथायज्ञोयजमानस्यैषचाख्यानसमयः॥८॥सप्त

Digitized by Vaidika Bharata/Suparna Trust, Maujpur, New Delhi.

५ मस्य द्वितीयः पादः॥ ॥३॥ तिस्र एव देवता इत्युक्तं पुरस्तात्ता
सां भक्तिसाहचर्यं व्याख्यास्यामो अथैतान्यग्निभक्तीन्ययं लोकः प्रा
तःसवनं वसंतो गायत्री त्रिवृत्स्तोमो रथंतरं साम ये च देवगणाः
समाम्नाताः प्रथमे स्थाने अग्नायी पृथिवी इळेति स्त्रियो अथास्य कर्म व
हनं च हविषामावाहनं च देवतानां यच्च किंचिद्दार्ष्टिविषयिकमग्नि
कर्मैव तदथास्य संस्तविका देवा इंद्रः सोमो वरुणः पर्जन्य ऋ
तवः आग्नावैष्णवं च हविर्न त्वृक्संस्तविकी दशतयीषु विद्यते अथा ५
प्याग्नापौष्णं हविर्न तु संस्तवस्तत्रैतां विभक्तस्तुतिमृचमुदाहरंति

॥१॥१२॥ पूषा त्वेतश्च्यावयतु प्र विद्वाननष्टपशुर्भुवनस्य गोपाः।
स त्वैतेभ्यः परि ददत्पितृभ्योऽग्निर्देवेभ्यः सुविदत्रियेभ्यः॥ पूषा त्वे
तः प्रच्यावयतु विद्वाननष्टपशुर्भुवनस्य गोपा इत्येष हि सर्वेषां
भूतानां गोपायिता स त्वैतेभ्यः परिददत्पितृभ्य इति सांशयि
कस्तृतीयः पादः पूषा पुरस्तात्तस्यान्वादेश इत्येकमग्निरुपरि
ष्टात्तस्य प्रकीर्तनेत्युपरं अग्निर्देवेभ्यः सुविदत्रियेभ्यः॥ सुवि
दत्रं धनं भवति विंदतेर्वैकोपसर्गाद्ददातेर्वा स्याद्द्व्युपसर्गात्॥
॥२॥१४॥ अथैतानींद्रभक्तीन्यंतरिक्षलोको माध्यंदिनं सवनं ग्री

Takshashila Project

६ ष्टस्त्रिष्टुप्छंदःपंचदशःस्तोमोबृहत्सामयेचदेवगणाःसमाम्नाताम
ध्यमेस्थानेयाश्चस्त्रियोयश्चास्यकर्मरसानुप्रदानंवृत्रवधोय
चकाचिद्बलकृतिरिंद्रकर्मैवतदथास्यसंस्तविकादेवाःअ
ग्निःसोमोवरुणःपूषाबृहस्पतिर्ब्रह्मणस्पतिःपर्वतःकुत्सो
विष्णुर्वायुरथापिमित्रोवरुणेनसंस्तूयतेपूष्णारुद्रेणचसो
मोवायुनाचपूषावातेनचपर्जन्यः॥३॥११॥अथैतान्यादि
त्यभक्तीन्यसौलोकस्तृतीयसवनंवर्षाजगतीसप्तदशःस्तो ६
मोवैरूपंसामयेचदेवगणाःसमाम्नाताउत्तमेस्थानेयाश्च

स्त्रियोयश्चास्यकर्मरसादानंरश्मिभिश्चरसधारणंयच्चकिंचित्प्र
वल्हितमादित्यकर्मैवतच्चंद्रमसावायुनासंवत्सरेणेतिसंस्त
वः॥४॥१२॥एतेष्वेवस्थानव्यूहेष्वृतुछंदस्तोमपृष्ठस्यभक्ति
शेषमनुकल्पयीतशरदनुष्टुबेकविंशःस्तोमोवैराजंसामे
तिपृथिव्यायतनानिहेमंतःपंक्तिस्त्रिणवःस्तोमःशाक्वरंसामे
त्यंतरिक्षायतनानिशिशिरोऽतिछंदास्त्रयस्त्रिंशःस्तोमोरैवतं
सामेतिद्युस्थानानि॥५॥१३॥मंत्रामननाच्छंदांसिछादनाद्यजु
र्यजतेःसामसंमितमृचास्यतेर्वाऋचासममंमेनइतिनैदानाः

Digitized by Vaidika Bharata/Suparna Trust, Maujpur, New Delhi.

७ यत्री गायतेः स्तुतिकर्मणः त्रिगमना वा विपरीता गायतो मुखा
दुदपतदिति च ब्राह्मणं ॥ ६ ॥ १४ ॥ उष्णिगुत्स्नाता भवति स्निह्यते
र्वा स्यात्कांतिकर्मणः ऽ उष्णीषिणी वेत्यौपमिकमुष्णीषं स्नाय
तेः ककुप् ककुभिनी भवति ककुप् च कुब्जश्च कुजतेर्वोब्जतेर्वानुष्टु
बनुष्टोभनाद्गायत्रीमेव त्रिपदां सतीं चतुर्थेन पादेनानुष्टो
न भतीति च ब्राह्मणं ॥ ७ ॥ १५ ॥ बृहती परिबर्हणात्पंक्तिः पंचपदा
त्रिष्टुप् स्तोभत्युत्तरपदा का तु त्रिता स्यात्तीर्णतमं छंदस्त्रिवृद्व ७
ज्रस्तस्य स्तोभतीति वा यत्त्रिरस्तोभत्तत्त्रिष्टुभस्त्रिष्टुप्त्वमि

ति विज्ञायते ॥ ८ ॥ १६ ॥ जगती गततमं छंदो जलचरगतिर्वा
जल्गल्यमानोऽसृजदिति च ब्राह्मणं विराड्विराजनाद्वा विराधना
द्वा विप्रापणाद्वा विराजनात्संपूर्णाक्षरा विराधनादूनाक्षरा वि
प्रापणादधिकाक्षरा पिपीलिकमध्येत्यौपमिकं पिपीलिका पे
लतेर्गतिकर्मणः ॥ ९ ॥ १७ ॥ इतीमा देवता अनुक्रांताः सूक्त
भाजो हविर्भाज ऋग्भाजश्च भूयिष्ठाः काश्चिन्निपातभाजो
ऽथोताभिधानैः संयुज्य हविश्चोदयतीन्द्राय वृत्रघ्न इन्द्रायांहो
मुच इति तान्यप्येके समामनंति भूयांसि तु समाम्नानाद्यत्तु सं

८ विज्ञानभूतंस्यात्प्राधान्यस्तुतितत्समामनेयोतकर्मभिःऋ
षिर्देवतांस्तौतिवृत्रहापुरंदरःऽइतितान्यप्येकेसमामनंतिभू
यांसितुसमाम्नानाद्व्यंजनमात्रंतुतत्तस्याभिधानस्यभवति
यथाब्राह्मणायबुभुक्षितायौदनंदेहिस्नातायानुलेपनंपिपा
सतेपानीयमिति॥१८॥१९॥सप्तमस्यतृतीयःपादः॥ ॥ॐ॥अ
थातोनुक्रमिष्यामोग्निःपृथिवीस्थानस्तंप्रथमंव्याख्यास्या
मोग्निःकस्मादग्रणीर्भवत्यग्रंयज्ञेषुप्रणीयतेंगंनयति ८
सन्नममानोक्नोपनोभवतीतिस्थौलाष्ठीविर्नक्नोपयतिन

स्नेहयतित्रिभ्यःऽआख्यातेभ्योजायतऽइतिशाकपूणिरिताद
क्ताद्दग्धाद्वानीतात्सखल्वेतेरकारमादत्तेगकारमनक्तेर्वादह
तेर्वानीःपरस्तस्यैषाभवति॥१॥२०॥अग्निमीळेपुरोहितंय
ज्ञस्यदेवमृत्विजंहोतारंरत्नधातमं॥अग्निमीळेग्निंयाचा
मीळिरध्येषणाकर्मापूजाकर्मावापुरोहितोव्याख्यातोयज्ञ
स्यदेवोदानाद्वादीपनाद्वाद्योतनाद्वाद्युस्थानोभवतीतिवा
योदेवःसादेवताहोतारंह्वातारंजुहोतेर्होतेत्यौर्णवाभो
रत्नधातमंरमणीयानांधनानांदातृतमंतस्यैषापराभवति

Takshashila Project

९ ॥२॥२०॥ अग्निः पूर्वेभिर्ऋषिभिरीड्यो नूतनैरुत । स देवाँ एह व
क्षति ॥ अग्निर्यः पूर्वैर्ऋषिभिरीडितव्योऽस्माभिश्च नवतरैः स
देवानिहावहत्विति स न मन्येतायमेवाग्निरित्यप्येते उत्तरे ज्यो
तिषी अग्नी उच्येते ततो नु मध्यमः ॥३॥२१॥ अभि प्रवंत समने
व योषाः कल्याण्यः स्मयमानासो अग्निं घृतस्य धाराः समि
धो नसंत ता जुषाणो हर्यति जातवेदाः ॥ अभिनमंत समनस
इव योषाः समनं समननात् संमाननाद्वा कल्याण्यः स्मयमाना ९
सोऽग्निमित्यौपमिकं घृतस्य धारा उदकस्य धाराः समिधो

नसंत नसतिराप्नोतिकर्मा वा नमतिकर्मा वा ता जुषाणो ह
र्यति जातवेदाः हर्यतिः प्रेप्साकर्मा विहर्यतीति समुद्रादूर्मिर्म
धुमाँ उदारदित्यादित्यमुक्तं मन्यंते समुद्राद्ध्येषोऽद्भ्य उदेतीति
च ब्राह्मणमथापि ब्राह्मणं भवत्यग्निः सर्वा देवता इति तस्यो
त्तरा भूयसे निर्वचनाय ॥४॥२२॥ इंद्रं मित्रं वरुणमग्निमाहु
रथो दिव्यः स सुपर्णो गरुत्मान् । एकं सद्विप्रा बहुधा वदंत्य
ग्निं यमं मातरिश्वानमाहुः ॥ इममेवाग्निं महांतमात्मानमेक
मात्मानं बहुधा मेधाविनो वदंतीद्रं मित्रं वरुणमग्निं दिव्यं च

Digitized by Vaidika Bharata/Suparna Trust, Maujpur, New Delhi.

Takshashila Project

२० गरुत्मंतं दिव्यो दिविजो गरुत्मान् गरणवान् गुर्वात्मा महात्मेति
वा यस्तु सूक्तं भजते यस्मै हविर्निरुप्यते यमेव सोग्निर्निपात
मेवैते ऽउत्तरे ज्योतिषी ऽएतेन नामधेयेन भजेते ॥ ५ ॥ २३ ॥ स
प्तमस्य चतुर्थपादः ॥ ॥ ७ ॥ जातवेदाः कस्माज्जातानि वेद जा
तानि वैनं विदुर्जाते जाते विद्यत इति वा जातवित्तो वा जातध
नो जातविद्यो वा जातप्रज्ञानो यत्तज्जातः पशूनविंदत तज्जातवे
दसो जातवेदस्त्वमिति च ब्राह्मणं तस्मात्सर्वानृतून्पशवो २०
ग्निमभिसर्पंतीति च तस्यैषा भवति ॥ १ ॥ २४ ॥ जातवेदसे सुन

वाम सोममरातीयतो निदहाति वेदः । स नः पर्षदति दुर्गाणि
विश्वा नावेव सिंधुं दुरितात्यग्निः ॥ जातवेदसः इति जातवेद
सां चैवं जातवेदसे र्चाय सुनवाम सोममिति प्रसवायाभिष
वाय सोमं राजानममृतमरातीयतो यज्ञार्थमनिस्मो निदहा
ति निश्चयेन दहति भस्मीकरोति सोमो ददद्दिसुर्थः स नः प
र्षदति दुर्गाणि विश्वानि दुर्गमानि स्थानानि नावेव सिंधुं नावा
सिंधुं सिंधुं नावा नदीं जलदुर्गं महाकूलां तारयति दुरितात्य
ग्निरिति दुरितानि तारयति तस्यैषापरा भवति ॥ २ ॥ २५ ॥

Digitized by Vaidika Bharata/Suparna Trust, Maujpur, New Delhi.

२१ प्रनूनंजातवेदसमश्वंहिनोतवाजिनं॥इदंनोबर्हिरासदे॥प्र
हिणुतजातवेदसंकर्मभिःसमश्नुवानमपिवोपमार्थेस्याद
श्वमिवजातवेदसमितीदंनोबर्हिरासीदत्त्वितितदेतदेक
मिवजातवेदसंगायत्रंतृचंदशतयीषुविद्यतेयत्तुकिंचिदा
ग्नेयंतज्जातवेदसानांस्थानेयुज्यतेसनमन्येतायमेवाग्निरि
त्यप्येतेऽउत्तरेज्योतिषीजातवेदसाऽउच्येतेततोनुमध्यमः।
अभिप्रवंतसमनेवयोषाऽइतितत्पुरस्ताद्व्याख्यातमथासा
वादित्यऽउदुत्यंजातवेदसमितितदुपरिष्टाद्व्याख्यास्यामो। २१

यस्तुसूक्तंभजतेयस्मैहविर्निरुप्यतेयमेवसोग्निर्जातवेदा
निपातमेवैतेऽउत्तरेज्योतिषीएतेननामधेयेनभजेते॥१९
॥२०॥सप्तमस्यपंचमःपादः॥ ॥ॐवैश्वानरःकस्माद्विश्वान्न
रान्नयंतिविश्वऽएनंनरानयंतीतिवापिवाविश्वानरऽएवस्या
त्प्रत्यृतःसर्वाणिभूतानितस्यवैश्वानरस्तस्यैषाभवति॥१
२१॥वैश्वानरस्यसुमतौस्यामराजाहिकंभुवनानामभिश्रीः।
इतोजातोविश्वमिदंविचष्टेवैश्वानरोयततेसूर्येण॥इतोजा
तःसर्वमिदमभिविपश्यतिवैश्वानरःसंयततेसूर्येणराजाय

Takshashila Project

१२ सर्वेषांभूतानामग्निरग्रणीर्यस्तस्यवयंवैश्वानरस्यकल्याण्यां
मतौस्यामेतितत्कोवैश्वानरोमध्यमऽइत्याचार्यावर्षकर्मणा
ह्येनंस्तौति॥२॥२८॥प्रनूमहित्वंवृषभस्यवोचंयंपूरवोवृत्र
हणंसचंते।वैश्वानरोदस्युमग्निर्जघन्वाँऽअधूनोत्काष्ठाऽअव
शंबरंभेत्॥प्रब्रवीमितन्महित्वंमहाभाग्यंवृषभस्यवर्षितु
रपांयंपूरवःपूरयितव्यामनुष्यावृत्रहणंमेघहनंसचंतेसे
वंतेवर्षकामादस्युर्दस्यतेःक्षयार्थादुपदस्यंत्यस्मिन्रसाऽ १२
उपदासयतिकर्माणितमग्निर्वैश्वानरोघ्नन्नवाधूनोदपःका

ष्ठाऽअभिनच्छंबरंमेघमथासावादित्यऽइतिपूर्वेयाज्ञिकाः॥३॥
२९॥एषांलोकानांरोहेणसवनानांरोहआम्नातोरोहात्प्रत्य
वरोहश्चिकीर्षितस्तामनुकृतिंहोताग्निमारुतेशस्त्रेवैश्वान
रीयेणसूक्तेनप्रतिपद्यतेसोपिनस्तोत्रियमाद्रियेताग्नेयोहिभ
वतिततऽआगच्छतिमध्यस्थानादेवतारुद्रंचमरुतश्चततोग्नि
मिहस्थानमत्रैवस्तोत्रियंशंसति॥४॥३०॥अथापिवैश्वानरी
योद्वादशकपालोभवत्येतस्यहिद्वादशविधंकर्माथापिब्राह्म
णंभवत्यसौवाऽआदित्योग्निर्वैश्वानरऽइत्यथापिनिवित्सौर्य

Digitized by Vaidika Bharata/Suparna Trust, Maujpur, New Delhi.

१३ वैश्वानरीभवत्यायोद्यांभास्यापृथिवीमित्येषहिद्यावापृथिव्यावा
भासयत्यथापिछांदोमिकंसूक्तंसौर्यंवैश्वानरंभवतिदिविपृ
ष्ठोऽअरोचतेत्येषहिदिविपृष्ठोऽअरोचतेत्यथापिहविष्यांती
यंसूक्तंसौर्यंवैश्वानरंभवति॥५॥२४॥अयमेवाग्निर्वैश्वान
रऽइतिशाकपूणिर्वैश्वानरावेतेऽउत्तरेज्योतिषीवैश्वानरोयं
यत्तास्मांजायतेकथन्वयमेतास्मांजायतऽइतियत्रवैद्युतः
शरणमभिहंतियावदनुपात्तोभवतिमध्यमधर्मैवतावद्भ २३
वत्युदकेंधनःशरीरोपशमनऽउपादीयमानऽएवायंसंपद्यत

ऽउदकोपशमनःशरीरदीप्तिः॥६॥२५॥अथादित्यादुदीचिप्रथ
मसमावृत्तऽआदित्येकंसंवामणिंवापरिमृज्यप्रतिस्वरेयत्रशु
ष्कगोमयमसंस्पर्शयंधारयतितत्प्रदीप्यतेसोयमेवसंपद्यतेत
थाप्याह॥वैश्वानरोयततेसूर्येणेति॥नचपुनरात्मनात्मासंय
ततेन्येनैवान्यःसंयततऽइतऽइममादधात्यमुतोमुष्यरश्मयः
प्रादुर्भवंतीतोस्यार्चिषस्तयोर्भासोःसंसंगंदृष्ट्वैवमवक्ष्यत्॥
॥७॥२६॥अथयान्येतान्यौत्तमिकानिसूक्तानिभागानिवासावि
त्राणिवापौष्णानिवावैश्वदेवानिवातेषुवैश्वानरीयाःप्रवादाऽ

Digitized by Vaidika Bharata/Suparna Trust, Maujpur, New Delhi.

Takshashila Project

१४ अत्रविष्णुनादित्यकर्मणाचैनमस्तौव्यन्नित्सुदेवीत्यस्तमेवी
तिविपर्येषीत्याग्नेयेष्वेवहिसूक्तेषुवैश्वानरीयाःप्रवादाभवं
त्यग्निकर्मणाचैनंस्तौतीतिदहसीतिवहसीतिपचसीतियथो
ऽएतद्वर्षकर्मणाचैनंस्तौतीत्यस्मिन्नप्येतदुपपद्यते॥८॥२४॥
समानमेतदुदकमुच्चैत्यवचाहभिः॥भूमिंपर्जन्याजिन्वंतिदि
वंजिन्वंत्यग्नयः॥इतिसानिगदव्याख्याता॥९॥२५॥सप्तमस्य
षष्ठःपादः॥ ॥ॐ॥कृष्णंनियानंहरयःसुपर्णाऽअपोवसाना
दिवमुत्पतंति।तऽआववृत्रन्त्सदनादृतस्यादिद्घृतेनपृथिवीव्यु १४

द्यते॥कृष्णंनिरयणंरात्रिरादित्यस्यहरयःसुपर्णाहरणाऽआ
दित्यरश्मयःस्तेयदामुतोर्वांचःपर्यावर्त्ततेसहस्थानादुदक
स्यादित्यादथघृतेनोदकेनपृथिवीव्युघतेघृतमित्युदकनाम
जिघर्त्तेःसिंचतिकर्मणोथापिब्राह्मणंभवत्यग्निर्वाऽइतोवृष्टिं
समीरयतिधामछद्दिवभूत्वावर्षतिमरुतःसृष्टांवृष्टिंनयं
तियदासावादित्योग्निंरश्मिभिःपर्यावर्त्ततेथवर्षतीतियथोऽ
एतदेहात्मस्त्रवरोहःश्विकीर्षितऽइत्याम्नायवचनादेतद्भवति
यथोऽएतत्॥१०॥२६॥वैश्वानरीयोद्वादशकपालोभवतीत्यनि

Digitized by Vaidika Bharata/Suparna Trust, Maujpur, New Delhi.

१५ र्वचनं कपालानि भवंत्यस्ति हि सोऽयं एककपालः पंचकपाल
श्चयथोऽएतद्ब्राह्मणं भवतीति वक्तुं भक्तिवादीनि हि ब्राह्मणा
नि भवंति पृथिवी वैश्वानरः संवत्सरो वैश्वानरो ब्राह्मणो वैश्वा
नरःऽइति यथोऽएतन्निविसौर्यं वैश्वानरी भवतीत्यस्यैव साभ
वतियो विश्नो मानुषीभ्यो दीदेदित्येष हि विश्नो मानुषीभ्यो दी
दयति यथोऽएतछांदोमिकं सूक्तं सौर्यं वैश्वानरं भवतीत्य
स्यैवतद्भवति जमदग्निभिराहुतयैःऽइति जमदग्नयः प्रजमि १५
ताग्नयो वा प्रज्वलिताग्नयो वा तैराहुतो भवति यथोऽएतद्

विश्वांऽतीयं सूक्तं सौर्यं वैश्वानरं भवतीत्यस्यैवतद्भवति ॥२
२॥ हविष्पांतमजरं स्वर्विदि दिविस्पृश्याहुतं जुष्टमग्नौ ॥ तस्य
भर्मणे भुवनाय देवा धर्मणे कं स्वधया पप्रथंत ॥ हविर्यंसा
नीयमजरं सूर्यविदि दिविस्पृश्याहुतं जुष्टमग्नौ तस्य भरणा
य च भावनाय च धारणाय चैतेभ्यः सर्वेभ्यः कर्मभ्यः इमम
ग्निमन्नेनापप्रथंत स्वधयाप्याहा ॥३॥२८॥ अपामुपस्थे महिषा
ऽअगृभ्णत विशो राजानमुपतस्थुर्ऋग्मियं ॥ आ दूतोऽअग्निमभ
रद्विवस्वतो वैश्वानरं मातरिश्वा परावतः ॥ अपामुपस्थेऽउप

Digitized by Vaidika Bharata/Suparna Trust, Maujpur, New Delhi.

२६ स्थाने महत्यंतरिक्षलोकऽआसीनामहांतऽइति वागत्कृत्नमा
ध्यमकादेवगणविशःऽइवराजानमुपतस्थुःऽग्निमियमृगर्थां श्वां
नमितिवार्चनीयमितिवाहरयंइतोदेवानांविवस्वतऽआदि
त्याद्विवस्वान्विवासनवान्प्रेरितवेतः परागतात्वास्याग्नेर्वैश्वा
नरस्यमातरिश्वानमाहर्त्तारमाहमातरिश्वावायुर्मातर्यंतरि
क्षेश्वसीतिमातर्याश्वनितीतिवाथैनमेतामांसर्वाणिस्था
नान्यभ्यापादंस्तौति॥४॥२६॥ मूर्द्धानुवोभवतिनक्तमग्निस्ततः २६
सूर्योजायतेप्रातरुद्यन्॥ मायामूतुयज्ञियानामेतामपोयत्तू

णिश्चरतिप्रजानन्॥ मूर्द्धामूर्द्धमस्मिन्धीयतेमूर्द्धायः सर्वेषां
भूतानांभवतिनक्तमग्निस्ततः सूर्योजायतेप्रातरुद्यन्सऽए
वप्रज्ञांत्वेतांमन्यंतेयज्ञियानांदेवानांयज्ञसंपादिनामपो
यत्कर्म्मचरतिप्रजानन्सर्वाणिस्थानान्यनुसंचरतेत्वरमाण
स्तस्योत्तराभूयसेनिर्वचनाय॥५॥४०॥ स्तोमेनहिदिविदेवा
सोऽअग्निमजीजनंछक्तिभीरोदसिप्रां॥ तमूऽअकृण्वंत्रेधा
भुवेकंसऽओषधीः पचतिविश्वरूपाः॥ स्तोमेनहियंदिविदेवा
ऽअग्निमजनयन्कर्मभिर्धीवापृथिव्योः पूरणंतमकुर्वंस्त्रेधा

१७ न्नावायपृथिव्यामंतरिक्षेदिवीतिशाकपूणिर्यदस्यदिवितृती
यंतदसावादित्यइतिब्राह्मणंतदस्तुतीकृत्यस्तौत्यथैनमेतया
दित्यीकृत्यस्तौति॥५॥४२॥यदेदेनमदधुर्यज्ञियासोदिविदे
वाःसूर्यमादितेयं।यदाचरिष्णूमिथुनावभूतामादित्प्राप
श्यन्भुवनानिविश्वा॥यदैनमदधुर्यज्ञियाःसर्वेदिविदेवाःसू
र्यमदितेःपुत्रंयदाचरिष्णूमिथुनौप्रादुरभूतांसर्वदासहचा
रिणावुषाश्चादित्यश्चमिथुनौकस्मान्मिनोतिश्रयतिकर्माथु १७
ऽइतिनामकरणस्थकारोवानयतिःपरोवनिर्वासमाश्रिता

वन्योन्यंनयतोवनुतोवामनुष्यमिथुनावप्येतस्मादेवमेथं
तावन्योन्यंवनुतऽइतिवाथैनमेतयाग्नीकृत्यस्तौति॥७॥४३॥
यत्रावदेतेऽअवरःपरश्चयज्ञन्योःकतरोनौविवेद।आशेकु
रिःसधमादंसखायोनसंतयज्ञमिदंविवोचत्॥यत्रविव
देतेदैव्यौहोतारावयंचाग्निरसौचमध्यमःकतरोनौयज्ञे
भूयोवेदेस्याशाकुर्वंतिलसहमदनंसमानख्यानाऽऋत्वि
जस्तेषांयज्ञंसमाश्नुवानानांकोनऽइदंविवक्ष्यतीतितस्मो
तरांभूयसेनिर्वचनाय॥८॥४४॥यावन्मात्रमुषसोनप्रती

Takshashila Project

१८ कंसुपर्ण्योवसंतेमातरिश्वः॥तावद्दधात्युपयज्ञमायन्ब्राह्म
णोहोतुरवरोनिषीदन्॥यावन्मात्रमुषसःप्रत्यक्षंभवतिप्र
तिदर्शनमितिवास्त्युपमानस्यसंप्रत्यर्थेप्रयोगइहेवनिधे
हीतियथासुपर्ण्यःसुपतनाःएतारात्रयोवसतेमातरिश्वं
ज्योतिर्वर्णस्यतावदुपदधातियज्ञमागच्छन्ब्राह्मणोहोतास्या
ग्नेर्होतुरवरोनिषीदन्होतृजपस्त्वमग्नेवैश्वानरीयोभवति
देवसवितरेतंत्वावृणतेऽग्निंहोत्रायसहपित्रावैश्वानरेणे १८
तीममेवाग्निंसवितारमाहसर्वस्यप्रसवितारंमध्यमंवोत्त

मंवापितरंयस्तुसूक्तंभजतेयस्मैहविर्निरुप्यतेयमेवसो
ग्निर्वैश्वानरोनिपातमेवैतेउत्तरेज्योतिषीएतेननाम
धेयेनभजेतेभजेते॥२॥४४॥सप्तमस्यसप्तमःपादः॥॥इ
तियास्काचार्यनिरुक्तेसप्तमोऽध्यायः॥७॥ ॥हरिःॐ॥द्र
विणोदाःकस्माद्धनंद्रविणमुच्यतेयदेनमभिद्रवंतिबलंवा
द्रविणंयदेनेनाभिद्रवंतितस्यदाताद्रविणोदास्तस्यैषाभव
ति॥१॥द्रविणोदाद्रविणसोग्रावहस्तासोऽअध्वरे॥यज्ञेषुदेव
मीळते॥द्रविणोदायस्त्वंद्रविणसइतिद्रविणसादिनइति
ल

Digitized by Vaidika Bharata/Suparna Trust, Maujpur, New Delhi.

१९ वा द्रविणसा निनऽइति वा द्रविणसस्तस्मात्पिबत्विति वा ॥ यु
ज्ञेषु देवमीळते । याचंति स्तुवंति वर्द्धयंति पूजयंतीति वा तत्को
द्रविणोदाऽइंद्रऽइति क्रौष्टुकिः स बलधनयोर्दातृतमस्तस्य च स
र्वा बलकृतिरोजसो जातमुत मन्यऽएनमिति चाहाथाप्यग्निं
द्राविणोदसमाहैष पुनरेतस्माज्जायते । योऽअश्मनोरंतरग्निं
जजानेत्यपि निगमो भवत्यथाप्यृतुयाजेषु द्राविणोदसाः प्र
वादा भवंति तेषां पुनः पात्रस्येंद्रपानमिति भवत्यथाप्येनं सो १९
मपानेन स्तौत्यथाप्याह द्रविणोदाः पिबतु द्राविणोदसऽइति

॥२॥ अयमेवाग्निर्द्रविणोदाऽइति शाकपूणिराग्नेयेष्वेव
हि सूक्तेषु द्राविणोदसाः प्रवादा भवंति । देवाऽअग्निंधारयं
द्रविणोदामित्यपि निगमो भवति यथोऽएतत्स बलधनयो
र्दातृतमऽइति सर्वासु देवतास्वैश्वर्यं विद्यते यथोऽएतदोज
सो जातमुत मन्यऽएनमिति चाहेत्ययमप्यग्निरोजसा ब
लेन मथ्यमानो जायते तस्मादेनमाह सहसस्पुत्रं सहसः स
सूनुं सहसो यहुं यथोऽएतदग्निं द्राविणोदसमाहेत्यृत्विजो
ऽत्र द्रविणोदसऽउच्यंते हविषो दातारस्ते चैनं जनयंति ॥ स

Takshashila Project

२० षीणां पुत्रो ऽ अधिराजः ऽ एषः ऽ इत्यपि निगमो भवति यथो ऽ एतत्से
वां पुनः पात्रस्थेंद्रपानमिति भवतीति भक्तिमात्रं तद्भवति यथा
वायव्यानीति सर्वेषां सोमपात्राणां यथो ऽ एतत्सोमपात्रे
ने स्तौतीति तस्मिन्नप्येतदुपपद्यते । सोमं पिब मंदसानो गण
श्रिभिरिति यथो एतद्विनोदः पिबतु द्रविणोदसः ऽ इत्यस्य
वतद्भवति ॥ १२ ॥ मेद्यंतु ते वह्नयो येभिरीयसे ऽरिषण्यन्वीळय
स्वा वनस्पते । आयूया धृष्णो ऽ अभिगूर्या त्वं नेष्ट्रात्सोमं द्रवि २०
णोदः पिब ऋतुभिः । मेद्यंतु ते वह्नयो वोढारो यैर्यास्यरिष्य

न्वीळयस्वा वनस्पते आयूय धृष्णो ऽ अभिगूर्य त्वं नेष्ट्रीयाद्धिष्ण्याद्धिष्ण्यो धि
षण्णो धिषणा भवति धिषणा वाग्धिषेर्दधात्यर्थे धीसादिनीति वा
धीसानिनीति वा वनस्पत ऽ इत्येनमाह एष हि वनानां पाता वा
पालयिता वा वनं वनोतेः पिब ऋतुभिः कालैः ॥ १३ ॥ अष्टमस्य
प्रथमः पादः ॥ ॥ ई ॥ अथात ऽ आप्रियः ऽ आप्रियः कस्मादाप्नो
तेः प्रीणातेर्वा आप्रीभिराप्रीणातीति च ब्राह्मणं तासामिध्मः प्र
थमागामी भवति इध्मः समिंधनात्तस्यैषा भवति ॥ १ ॥ समि
द्धो ऽद्य मनुषो दुरोणे देवो देवान्यजसि जातवेदः ऽ आ च व

Digitized by Vaidika Bharata/Suparna Trust, Maujpur, New Delhi.

Takshashila Project

२१ हमित्रमहश्चिकित्वां त्वं दूतः कविरसि प्रचेताः ॥ समिद्धोऽद्य
मनुष्यस्य मनुष्यस्य गृहे देवो देवान्यजसि जातवेद आ च व
ह मित्रमहश्चिकित्वांश्चेतनावांस्त्वं दूतः कविरसि प्रवृद्धचेता
यज्ञेध्मः इति कात्थक्योऽग्निरिति शाकपूणिस्तनूनपादि
त्यनन्तरायाः प्रजाया नामधेयं निर्णततमा भवति गौरत्र तन्
रुच्यते ततोऽस्यां भोगास्तस्याः पयो जायते पयस आज्यं
जायतेऽग्निरिति शाकपूणिरापोऽत्र तन्व उच्यन्ते ततोऽन्तरि २१
क्षे ताभ्य ओषधिवनस्पतयो जायन्ते ओषधिवनस्पतिभ्य

एष जायते तस्यैष भवति ॥ २ ॥ तनूनपात्पथ ऋतस्य या
नान्मध्वा समञ्जन्स्वदया सुजिह्व । मन्मानि धीभिरुत यज्ञमृन्ध
न्देवत्रा च कृणुह्यध्वरं नः ॥ तनूनपात्पथ ऋतस्य यानान्य
ज्ञस्य यानान्मधुना समञ्जन्स्वदय कल्याणजिह्व मननानि च
नो धीभिर्यज्ञं च समर्द्धय देवान्नो यज्ञं गमय नराशंसो यज्ञ
इति कात्थक्यो नरा अस्मिन्नासीनाः शंसन्त्यग्निरिति शाक
पूणिर्नरैः प्रशस्यो भवति तस्यैष भवति ॥ ३ ॥ नराशंसस्य
स्य महिमानमेषामुपस्तोषाम यजतस्य यज्ञैः ॥ ये सुक्रत

Digitized by Vaidika Bharata/Suparna Trust, Maujpur, New Delhi.

Takshashila Project

२२ वः शुच्चयोधियंधाः स्वदंतिदेवाऽउभयानिहव्या॥ नराशंसस्य
महिमानमेषामुपस्तुमोयज्ञियस्ययज्ञैर्येसुकर्माणः शुचयो
धियंधारयितारः स्वदयंतुदेवाऽउभयानिहवींषिसोमंचेत
राणिचेतिवातांत्राणिचावापिकानिचेतिवेद्यइहस्तुतिक
र्मणइंधतेर्वातस्यैषान्नवति॥४॥८॥ आजुह्वानईड्योवंद्यश्चा
याह्यग्नेवसुभिः सजोषाः॥ त्वंदेवानामसियह्वहोतासऽएनान्
यक्षीषितोयजीयान्॥ आह्वयमानईडितोवंदितव्यश्चाया २२
ह्यग्नेवसुभिः सहजोषणः त्वंदेवानामसियह्वहोतायह्वइति

लि २

हैं

महतोनामधेयंजातश्चहूतश्चान्नवति। सऽएनान्यक्षीषितो
यजीयान्॥ इषितः प्रेषितइतिवाधीष्टइतिवायजीयान्यष्टृत
रोबर्हिः परिवेषणत्रस्यैषान्नवति॥५॥९॥ प्राचीनंबर्हिः प्रदि
शापृथिव्यावस्तोरस्यावृज्यतेऽअग्रेऽअह्नां॥ व्युप्रथतेवितरंव
रीयोदेवेभ्योऽअदितयेस्योनं॥ प्राचीनंबर्हिः प्रदिशापृथिव्या
वसनायास्याः प्रवृज्यतेऽअग्रेऽअह्नांबर्हिः पूर्वाह्णेतद्विप्रथ
तेविकीर्णतरमितिवाविस्तीर्णतरमितिवावरीयोवरतर
मुरुतरंवादेवेभ्यश्चादितयेचस्योनंस्योनमितिसुखनाम

Digitized by Vaidika Bharata/Suparna Trust, Maujpur, New Delhi.

२

२२ स्वतेर्वा स्यंते तत्सेवितव्यं भवतीति वा द्वारो जवतेर्वा द्रवतेर्वा वा

रयतेर्वा तासामेषा भवति ॥ ६ ॥ १० ॥ व्यचस्वतीरुर्विया विश्र

यंतां पतिभ्यो न जनयः शुंभमानाः । देवीर्द्वारो बृहतीर्विश्वमि

न्वा देवेभ्यो भवत सुप्रायणाः ॥ व्यचस्वत्यऽउरुत्वेन विश्रयं

तां पतिभ्यऽइव जायाऽऊरू मैथुने धर्मे शुंभमाना अवर

तरसंगमम् ऊरू देव्यो द्वारो बृहत्यो महत्यो विश्वमिन्वा विश्वमाभि

रेति यज्ञे गृहद्वारऽइति कात्थक्यो ऽग्निरिति शाकपूणिरुषासा २२

नक्तोषाश्च नक्ता चोषा व्याख्याता नक्तेति रात्रिनामानक्ति

भूतान्यवश्यायेनापि वा नक्ता व्यक्तवर्णा तयोरेषा भवति ॥ ७

॥ ११ ॥ आ सुष्वयंती यजते उपाके उषासानक्ता सदतां नि

योनौ । दिव्ये योषणे बृहती सुरुक्मे अधि श्रियं शुक्रपिशं द

धाने ॥ सेष्मीयमाणेऽइति वा सुष्वापयंत्याविति वासीदता

मिति वा न्यासीदतामिति वा यज्ञियेऽउपक्रांते दिव्ये योषणे बृ

हत्यौ महत्यौ सुरुक्मे सुरोचनेऽअधिदधाने शुक्रपेशसं श्रियं

शुक्रं शोचतेर्ज्वलतिकर्मणः पेशऽइति रूपनाम पिंशतेर्वि

पिंशितं भवति दैव्या होतारा दैव्यौ होतारौ अयं चाग्निरसौ

Takshashila Project

२४ चमध्वमुःस्तयोरेवान्नवेति॥८॥१२॥दैव्याहोताराप्रथमासु
वाचामिमानायज्ञंमनुषोयजध्यै।प्रचोदयंताविदथेषुकारू
प्राचीनंज्योतिःप्रदिशादिशंता॥दैव्योहोतारौप्रथमौसुवाचौ
निर्मिमानौयज्ञंमनुष्यस्ययजनायप्रचोदयमानौयज्ञेषुक
र्त्तारौपूर्वस्यांदिशियष्टव्यमितिप्रदिशंतौ।तिस्रोदेवीस्तिस्रो
देव्यस्तासामेवान्नवेति॥९॥१३॥आनोयज्ञंभारतीतूयमे
सा त्विळामनुष्वदिहचेतयंती।तिस्रोदेवीर्बर्हिरेदंस्योनंसरस्व २४
तीस्वपसःसदंतु॥ऐतुनोयज्ञंभारतीक्षिप्रंभरतःआदित्य

स्तस्यभाऽइळाचमनुष्यवदिहचेतयमाना।तिस्रोदेव्योबर्हि
रिदंसुखंसरस्वतीवसुकर्मणःआसीदंतुत्वष्टात्तूर्णमद्भुत
ऽइतिनैरुक्ताःत्विषेर्वास्याद्दीप्तिकर्मणःत्वक्षतेर्वास्यात्करोति
कर्मणःस्तस्यैवान्नवेति॥१०॥१४॥यऽइमेद्यावापृथिवीजनि
त्रीरूपैरपिंशद्भुवनानिविश्वा।तमद्यहोतरिषितोयजीयान्दे
वंत्वष्टारमिहयक्षिविद्वान्॥यइमेद्यावापृथिव्यौजनयित्र्यौ
रूपैरकरोद्भूतानिचसर्वाणितमद्यहेतरिषितोयजीयन्दे
वंत्वष्टारमिहयजविद्वान्माध्यमकस्त्वष्टेत्याहुर्मध्यमेचस्था

Digitized by Vaidika Bharata/Suparna Trust, Maujpur, New Delhi.

२५ ऽसमाम्नातोऽग्निरिति शाकपूणिस्तस्यैषापरा भवति॥११॥१५॥आ
विष्ट्यो वर्द्धते चारुरासु जिह्मानामूर्ध्वः स्वयशा उपस्थे। उभे त्वष्टु
र्बिभ्यतुर्जायमानात्प्रतीची सिंहं प्रतिजोषयेते॥ आविरावेद
नात्तसो वर्द्धते चारुरासु चारुचरन्ते जिह्मं जिह्मते रूर्ध्वमुद्धतं भ
वति स्वयशा आत्मयशा उपस्थ उपस्थाने। उभे त्वष्टुर्बिभ्य
तुर्जायमानात् द्यावापृथिव्याविति वाहोरात्रे इति वारणी इति
वा प्रत्यक्ते सिंहं सहनं प्रत्यासेवेते॥१२॥१६॥अष्टमस्य द्विती २५
यः पादः॥ ॥ॐ॥ वनस्पतिर्व्याख्यातस्तस्यैषा भवति॥१॥आ

उपावसृज त्मन्या समञ्जन्देवानां पाथ ऋतुथा हवींषि। वन
स्पतिः शमिता देवो अग्निः स्वदन्तु हव्यं मधुना घृतेन॥ उपाव
सृजात्मनात्मन्या समञ्जन्देवानामन्नमृतावृतो हवींषि का
ले काले वनस्पतिः शमिता देवो अग्निरित्येते त्रयः स्वदन्तु
हव्यं मधुना च घृतेन च तत्को वनस्पतिर्यूप इति कात्थक्यो
ऽग्निरिति शाकपूणिस्तस्यैषापरा भवति॥२॥१८॥अञ्जन्ति
त्वामध्वरे देवयन्तो वनस्पते मधुना दैव्येन। यदूर्ध्वस्तिष्ठा
द्रविणेह धत्ताद्यद्वा क्षयो मातुरस्या उपस्थे। अञ्जन्ति त्वामध्व

Digitized by Vaidika Bharata/Suparna Trust, Maujpur, New Delhi.

Takshashila Project

२९ रे देवान्कामयमानो वनस्पते मधुना देव्येन घृतेन च यद्दूर्ध्वस्था
स्पथिड विला निच नो धास्यसि यद्वा ते कृतः क्षयो मातुरस्याऽउप
स्थऽउपस्था नेग्निरिति शाकपूणिस्तस्यैषापराभवति॥३॥१९॥दे
वेभ्यो वनस्पते हवींषि हिरण्यपर्ण प्रदिवस्तेऽअर्थं प्रदक्षिणि
द्रशनया नियूय ऋतस्य वक्षि पथिभी रजिष्ठैः॥देवेभ्यो वन
स्पते हवींषि हिरण्यपर्णऋतपर्ण पिवोपमार्थस्याद्धिरण्यवर्ण
मोर पर्णति प्रदिवस्तेऽअर्थं पुराणस्ते सोर्थीयं ते प्रब्रूवो यज्ञस्य व २९
हपथिभी रजिष्ठैर्ऋजुतमैरजस्वलतमैः अपिष्टतमैरिति वात

स्यैषापराभवति॥४॥२०॥वनस्पतेरशनया नियूय पिष्टत
मया वयुनानि विद्वान्॥वह देवत्रा दिधिषो हवींषि प्र च दातार
ममृतेषु वोचः॥वनस्पते रशनया नियूय सुरूपतमया वयु
नि नानि विद्वान्प्रज्ञानानि प्रजानन्वह देवान्दातुर्हवींषि प्रब्रूहि च
दातारममृतेषु देवेषु स्वाहाकृतयः स्वाहेत्येतस्युऽआहेति वा
स्वा वागाहेति वा स्वं प्राहेति वा स्वाहुतं हविर्जुहोतीति वा तासा
मेषा भवति॥५॥२१॥सद्योजातो व्यमिमीत यज्ञमग्निर्देवानां
मभवत्पुरोगाः॥अस्य होतुः प्रदिश्यृतस्य वाचि स्वाहाकृतं हवि

Digitized by Vaidika Bharata/Suparna Trust, Maujpur, New Delhi.

२३ रिदंतुदेवाः॥सद्योजायमानोनिरमिमीतयज्ञमग्निर्देवानामभ
वत्पुरोगाः।अस्यहोतुःप्रदिश्यृतस्यवाच्यास्येस्वाहाकृतंहविर
दंतुदेवाःइतीमाआप्रीदेवताःअनुक्रांताःअथकिंदेवताःप्र
याजानुयाजाःआग्नेयाःइत्येके॥६॥२२॥प्रयाजानन्मेःअनुया
जांश्चकेवलानूर्जस्वंतंहविषोदत्तभागं।घृतंचापांपुरुषंचौ
षधीनामग्नेश्चदीर्घमायुरस्तुदेवाः॥तवप्रयाजाःअनुया
जाश्चकेवलःऊर्जस्वंतोहविषःसंतुभागाः॥तवाग्नेयज्ञोऽ २३
यमस्तुसर्वस्तुभ्यंनमंतांप्रदिशश्चतस्रः॥आग्नेयावैप्रया

जाःआग्नेयाःअनुयाजाःइतिचब्राह्मणंछंदोदेवताःइत्यप
रंछंदांसिवैप्रयाजाश्छंदांस्यनुयाजाःइतिचब्राह्मणमृतुदे
वताःइत्यपरमृतवोवैप्रयाजाःपशवोनुयाजाःइतिचब्रा
ह्मणंप्राणदेवताःइत्यपरंप्राणावैप्रयाजाःअपानाःअ
नुयाजाःइतिचब्राह्मणमात्मदेवताःइत्यपरमात्मावैप्रया
जाःप्रजाःनुयाजाःइतिचब्राह्मणमाग्नेयाःइतितुस्थितिर्भ
क्तिमात्रमितरत्किमर्थंपुनरिदमुच्यतेयस्यैदेवतायैहवि
र्गृहीतंस्यात्तांमनसाध्यायेद्वषट्करिष्यन्नितिहविज्ञायतेता

२८ न्येतान्येकादशाप्रीसूक्तानि तेषां वासिष्ठमात्रेयं वाध्र्यश्वं गा
र्त्समदमिति नाराशंसवन्ति मेधातिथं दैर्घतमसं प्रैषिकमि
त्युभयवन्त्यतोन्यानि तनूनपात्वन्ति तनूनपात्वन्ति ॥२२॥
अष्टमस्य तृतीयः पादः॥ ॥इति यास्काचार्यनिरुक्ते अष्टमो
ध्यायः समाप्तः॥ ॥हरिः ॐ॥ अथ यानि पृथिव्यायतनानि
सत्वानि स्तुतिं लभन्ते तान्यतोनुक्रमिष्यामस्तेषामश्वः प्रथ
मागामी भवत्यश्वो व्याख्यातस्तस्यैषा भवति ॥१॥ अश्वो वोळ्हा २८
सुखं रथं हसनामुपमन्त्रिणः॥ शेपो रोमण्वन्तौ भेदौ वारिन्मं

डूकः इच्छतीन्द्रायेन्दो परिस्रव॥ अश्वो वोळ्हा सुखं वोळ्हा सुख
मिति कल्याणनामकल्याणं पुण्यं सुहितं भवति मा नो व्याख्यात
स्तस्यैषा भवति ॥२॥ मा नो मित्रो वरुणो अर्यमायुरिन्द्र ऋभु
क्षा मरुतः परिख्यन्॥ यद्वाजिनो देवजातस्य सप्तेः प्रवक्ष्यामो हृयां
विदथे वीर्याणि॥ यद्वाजिनो देवजातस्य सप्तेः सरणस्य प्रव
क्ष्यामो यज्ञे विदथे वीर्याणि मा नस्त्वं मित्रश्च वरुणश्चार्यमा चा
युश्च वायुरयन इन्द्रश्चोरुक्षयण ऋभूणां राजेति वा मरुत
श्च परिख्यं कुत्सिः शाक्रौत्युन्नेतुमान्मानं शाक्रोति नदितु

Takshashila Project

२९ मितिवाशक्नोतित्वकिंतुमितिवासर्वतः शंकरोस्त्विति वा श
क्नोतेर्वालस्यैष्मापरान्नवति॥३॥ कनिक्रदज्जनुषंप्रब्रुवाण
इयर्तिवाचमरितेवनावं। सुमंगलश्चशकुनेभवासि मा
त्वाकाचिदभिभाविश्वाविदत्॥ न्यक्रंदीज्जन्मप्रब्रुवाणोय
यास्यशब्दस्तथानामेरयतिवाचमीरयितेवनावंसुमंगल
श्चशकुनेभवकल्याणमंगलोमंगलंगिरतेर्गृणात्यर्थेगि
रत्यनर्थानितिवांगलमंगंवन्मज्जयतिपापकमितिनैरुक्ता २९
मंगच्छत्वितिवामाचत्वाकाचिदभिभूतिःसर्वतोविदत्स

त

मदमर्थमभ्युच्छिलंकपिंजलोभिन्नवाशोतदभिवाद्यि...षोभ
वति॥४॥ भद्रंवददक्षिणतोभद्रमुत्तरतोवद। भद्रंपुरस्तान्नोव
दभद्रंपश्चात्कपिंजल॥ इतिसानिगदव्याख्याता। गृत्समदोगृ
त्समदनोगृत्सइतिमेधाविनामगृणातेस्तुतिकर्मणोमंडू
कामज्जूकामज्जनान्मदतेर्वामोदतिकर्मणोमंदतेर्वातृप्तिक
र्मणोमंडयतेरितिवैयाकरणामंडएषामोकइतिकामंडो
मदेर्वामुदेर्वातेषामेषाभवति॥५॥ संवत्सरंशशयानाब्रा
ह्मणाव्रतचारिणः। वाचंपर्जन्यजिन्वितांप्रमंडूकाअवादि

Digitized by Vaidika Bharata/Suparna Trust, Maujpur, New Delhi.

Takshashila Project

२० षुः॥संवत्सरंशशयानाब्राह्मणाव्रतचारिणोब्रुवाणादपिवोपमार्थे
स्याद्ब्राह्मणाऽइवव्रतचारिणऽइतिवाचंपर्जन्यप्रीतांप्रावादिषुर्मं
डूकावसिष्ठोवर्षकामःपर्जन्यंतुष्टावतंमंडूकाऽअन्वमोदंतस
मंडूकाननुमोदमानान्दृष्ट्वातुष्टावतदभिवादिन्येषऋग्भवति॥
उपप्रवदमंडूकिवर्षमावदतादुरि।मध्येह्रदस्यप्लवस्वविगृह्य
चतुरःपदः॥इतिसानिगदव्याख्याता॥अक्षाऽअश्नुवंत्येनानितिवाअ
श्नुवतएभिरितिवातेषामेषाभवति॥१॥प्रावेपामाबृहतोमा २०
दयंतिप्रवातेजाऽइरिणेवर्वृतानाः॥सोमस्येवमौजवतस्य

भक्षोविभीदकोजागृविर्मह्यमच्छान्॥प्रवेपिणोमामहतोविभी
दकस्यफलानिमादयंतिप्रवातेजाःप्रवणेजाऽइरिणेवर्तमा
नाऽइरिणंनिरृणंऋणातेरपार्णंभवत्यपरताऽअस्मादोषध
यऽइतिवामौजवतोमूजवतिजातोमूंजवान्पर्वतोमुंजवान्मुं
जोविमुच्यतऽइषीकयेषीकेषतेर्गतिकर्मणःऽइयमपीतरेषी
कैतस्मादेवविभीदकोविभेदनाज्जागृविर्जागरणान्मह्यमच
च्छदत्प्रशंसत्येनान्प्रथमयानिंदत्युत्तराभिःऽऋषेरक्षपरिद्यूत
स्यैतदार्षंवेदयंतेग्रावाणोहंतेर्वागृणातेर्वागृह्णातेर्वामे

Digitized by Vaidika Bharata/Suparna Trust, Maujpur, New Delhi.

Takshashila Project

३१ षा भवति॥८॥ प्रैते वदन्तु प्र वयं वदाम ग्रावभ्यो वाचं वदता वद
द्भ्यः॥ यदद्रयः पर्वताः साकमाशवः श्लोकं घोषं भरथेन्द्राय सोमि
नः॥ प्रवदन्त्वेते प्रवदाम वयं ग्रावभ्यो वाचं वदत वदद्भ्यो यद
द्रयः पर्वता आदरणीयाः सह सोमम् आशवः क्षिप्रकारिणः श्लो
कः शृणोतेर्घोषो घुष्यतेः सोमिनो यूयं स्थेति वा सोमिनो गृहेष्वि
ति वा येन नराः प्रशस्यन्ते स नाराशंसो मन्त्रस्तस्यैषा भवति॥९॥
अमन्दान्स्तोमान्प्र भरे मनीषा सिन्धावधिक्षियतो भाव्यस्य। यो ३१
मे सहस्रममिमीत सवानतूर्तो राजा श्रव इच्छमानः॥ अमन्दा

न्स्तोमानबालिशाननल्पान्वा बालो बलवर्ती भर्तव्यो भवत्यम्बा
स्मा अलं भवतीति वाम्बास्मै बलं भवतीति वा बलो वा प्रतिषे
धव्यवहितः प्रभरे मनीषया मनस ईषया स्तुत्या प्रज्ञया वा सिं
धावधिनिवसतो भावयव्यस्य राज्ञो यो मे सहस्रं निरमिमीत स
वानतूर्तो राजातूर्ण इति वात्वरमाण इति वा प्रशंसामिच्छमा
नः॥१०॥ नवमस्य प्रथमः पादः॥ ॥ॐ॥ यज्ञसंयोगाद्राजा स्तुतिं
लभेत राजसंयोगाद्युद्धोपकरणानीति तेषां रथः प्रथमागामी भ
वति रंहतेर्गतिकर्मणः स्थिरतेर्वा स्याद्विपरीतस्य रममाणो

Digitized by Vaidika Bharata/Suparna Trust, Maujpur, New Delhi.

Takshashila Project

३२ स्मिंस्तिष्ठतीतिवा रथपतेर्वातस्यैषाभवति॥१॥११॥वनस्पतेवीड्व
ंगोहिभूयाऽअस्मत्सखाप्रतरणः सुवीरः॥गोभिःसन्नद्धोअसिवी
डयस्वास्थातातेजयतुजेत्वानि॥वनस्पतेदृढांगोहिभवास्मत्
सखाप्रतरणःसुवीरःकस्मात्ऽवीरोगोभिःसन्नद्धोऽसिवीडय भिः
स्वेतिसंस्तंभस्वास्थातातेजयतुजेतव्यानिदुंदुभिरितिशब्दानुकर
णंदुमोभिन्नऽइतिवादुंदुम्यतेर्वास्याद्धकर्मणस्तस्यैषाभवति॥
॥२॥१२॥उपश्वासयपृथिवीमुतद्यांपुरुत्रातेमनुतांविष्ठितंजग ३२
त्॥सदुंदुभेसजूरिंद्रेणदेवैर्दूराद्दवीयोऽअपसेधशत्रून्॥उप

श्वासयपृथिवींचदिवंचबंधुधातेघोषंमन्यतांविष्ठितंस्थावरं
जंगमंचयत्सदुंदुभेसहजोषणऽइंद्रेणचदेवैश्चदूराद्दूरतरमपसे
धशत्रून्निषुधिरिषूणांनिधानंतस्यैषाभवति॥३॥१३॥बह्वीनां
पिताबहुरस्यपुत्रश्चिश्चाकृणोतिसमनावगत्यऽइषुधिःसंकाः
पृतनाश्चसर्वाःपृष्ठेनिनद्धोजयतिप्रसूतः॥बह्वीनांपिताब
हुरस्यपुत्रऽइतिइषूनभिप्रेत्यप्रस्मयतेऽइतिवाऽवध्रीयमाणःशब्दा
नुकरणंवासंकाःसचतेसंपूर्वाद्वाकिरतेःपृष्ठेनिनद्धोजय
तिप्रसूतऽइतिव्याख्यातंहस्तघ्नोहस्तेहन्यतेतस्यैषाभवति॥

Digitized by Vaidika Bharata/Suparna Trust, Maujpur, New Delhi.

Takshashila Project

२२ ॥४॥१४॥ अहिरिव भोगैः पर्येति बाहुं ज्याया हेतिं परिबाधमानः
नि २ हस्तघ्नो विश्वा वयुनानि विद्वान्पुमान्पुमांसं परि पातु विश्वतः ॥ अ
हिरिव भोगैः परिवेष्टयति बाहुं ज्याया वधात्परित्रायमाणो हस्त
घ्नः सर्वाणि प्रज्ञानानि प्रजानन्पुमानुरुमना भवति पुंसतेर्वाभी
शवो व्याख्याता स्तेषामेषा भवति ॥५॥१५॥ रथे तिष्ठन्नयति वा
जिनः पुरो यत्रयत्र कामयते सुषारथिः ॥ अभीशूनां महिमानं प
नायत मनः पश्चादनु यच्छन्ति रश्मयः ॥ रथे तिष्ठन्नयति वाजिनः २२
पुरस्तात्सतो यत्रयत्र कामयते सुषारथिः कल्याणसारथिरभी

शूनां महिमानं पूजयाम मनः पश्चात्सतोनुयच्छन्ति रश्मयो धनुर्ध
न्वतेर्गतिकर्मणो वधकर्मणो वा धन्वन्त्यस्मादिषवस्तस्यैषा भ
वति ॥६॥१६॥ धन्वना गा धन्वनाजिं जयेम धन्वना तीव्राः समदो
जयेम ॥ धनुः शत्रोरपकामं कृणोति धन्वना सर्वाः प्रदिशो जयेम
इति सा निगदव्याख्याता ॥ समदः समदो वात्तेः संमदो वा मदतेर्ज्या
जयतेर्वा जिनातेर्वा प्रजावयतीषूनिति वा तस्या एषा भवति ॥७
१७॥ वक्ष्यन्तीवेदा गनीगन्ति कर्णं प्रियं सखायं परिषस्वजाना । यो
षेव शिंक्ते वितताधि धन्वञ्ज्या इयं समने पारयन्ती । वक्ष्यन्तीवाग

Digitized by Vaidika Bharata/Suparna Trust, Maujpur, New Delhi.

म

२४ छति कर्णे प्रियमिव सखायमिषुं परिषस्वजमाना योषेव शब्दं क
रोति वितताधि धनुर्षि ज्येयं स[illegible]ने संग्रामे पारयंती शुद्धैर्बतेर्ग
ति कर्मणस्तस्यैषा भवति ॥८॥१८॥ सुपर्णं वस्ते मृगो अस्या
दंतो गोभिः सन्नद्धा पतति प्रसूता ॥ यत्रा नरः सं च वि च द्रवंति त
त्रास्मभ्यमिषवः शर्म यंसन् ॥ सुपर्णं वस्ते इति वाजानमिषुं
त्य मृगमयो ऽस्या दंतो मृगयतेर्वा गोभिः संनद्धा पतति प्रसूतेति
व्याख्यातं यत्र नराः संद्रवंति च विद्रवंति च तत्रास्मभ्यमिषवः
शर्म यच्छंतु शरणं संग्रामे ष्वाजनीं कशेत्याहुः कशा प्रकाश २४

यति भयमश्वाय कृष्यतेर्वाणुभावाद्वा कृपुनः प्रकाशयत्यर्थो
नै०स्व [illegible]कशायाः क्रोशतेर्वाश्यककशाया एषा भवति ॥८॥१८॥ आजंघं
ति सान्वेषां जघनां उपजिघ्नते । अश्वाजनि प्रचेतसो ऽश्वान्समत्
सु चोदय ॥ आ घ्नेति सानून्येषां सरणानि सक्थीनि सक्थिः स
नै चतेरासक्तो ऽस्मिन्काया जघनानि चोपघ्नति जघनं जंघन्यतेरश्वा
जनि प्रचेतसो ऽश्वान्समत्सु समरणेषु संग्रामेषु चोदयोलूख
लमुरुकरं वोर्ध्वखं वोत्करं वोरु मे कुर्वित्यब्रवीत्तदुलूखलमभ
भवदुरुकरं वै तत्तदुलूखलमित्याचक्षते परोक्षेणेति च ब्रा

३५ न्द्रं तस्यैषा भवति ॥२०॥२४॥ यच्चिद्धि त्वं गृहेगृह उलूखलक
युज्यसे ॥ इह द्युमत्तमं वद जयतामिव दुन्दुभिः ॥ इति सा निगद
१२१ व्याख्याता ॥११॥ नवमस्य द्वितीयः पादः ॥ ॥३॥ वृषभः प्रजां व
र्षतीति वातिबृहति रेत इति वा तद्वृषकर्मा वर्षणाद्वृषभस्तस्यै
षा भवति ॥२१॥२२॥ न्यक्रंदयन्नुपयंत एनममेहयन्वृषभं मध्य
आजेः । तेन सूभर्वं शतवत्सहस्रं गवां मुद्गलः प्रधने जिगाय ॥
न्यक्रंदयन्नुपयंत एनमिति व्याख्यातममेहयन्वृषभं मध्य आ ३५
जयनस्याजवनस्येति वा तेन सूभर्वं राजानं भर्वतिरत्तिकर्मा

तद्वा सूभर्वं सहस्रं गवां मुद्गलः प्रधने जिगाय प्रधन इति संग्रा
मनाम प्रकीर्णान्यस्मिन्धनानि भवंति द्रुघणो द्रुममयो घनस्तत्रे
तिहासमाचक्षते मुद्गलो भार्म्यश्व ऋषिर्वृषभं च द्रुघणं च युक्त्वा सं
ग्रामे व्यवहृत्याजिं जिगाय तदभिवादिन्येषर्ग्भवति ॥२३॥ इमं
तं पश्य वृषभस्य युञ्जं काष्ठाया मध्ये द्रुघणं शयानं । येन जिगाय
शतवत्सहस्रं गवां मुद्गलः पृतनाज्येषु ॥ इमं तं पश्य वृषभस्य स
हयुजं काष्ठाया मध्ये द्रुघणं शयानं येन जिगाय शतवत्सहस्रं गवां
मुद्गलः पृतनाज्येषु पृतनाज्य इति संग्रामनाम पृतनानामज

Takshashila Project

३६ नाद्वाजायत नामामुद्गलो मुद्गवान्मुद्गगिलो मदनं गिलतीति वा
मदंगिलो वा मुदंगिलो वा भार्म्यश्वो भृम्यश्वस्य पुत्रो भृम्यश्वो भृ
मयोस्याश्वाः अश्वभरणाद्वा पितुरित्यन्ननाम पातेर्वा पिबते
र्वा प्यायतेर्वा तस्यैषा भवति ॥२३॥ पितुन्नु स्तोषं महो धर्मा
णं तविषीं । यस्य त्रितो व्योजसा वृत्रं विपर्वमर्दयत् ॥ तं पितुं स्तौ
मि महतो धारयितारं बलस्य तविषीति बलनाम तवतेर्वा वृद्धिक
र्मणो यस्य त्रितो व्योजसा बलेन त्रितस्त्रिस्थान इन्द्रो वृत्रं विप ३६
र्वाणं व्यर्दयति नद्यो व्याख्यातास्तासामेषा भवति ॥२४॥ इमं

मे गंगे यमुने सरस्वति शुतुद्रि स्तोमं सचता परुष्ण्या । असिक्न्या
मरुद्वृधे वितस्तयार्जीकीये शृणुह्या सुषोमया ॥ इमं मे गंगे यमु
ने सरस्वति शुतुद्रि परुष्णि स्तोममासेवध्वमसिक्न्या च सह मरु
द्वृधे वितस्तया चार्जीकीये आशृणुहि सुषोमया चेति समस्ता
र्थः ऐकपदनिरुक्तं गंगा गमनाद्यमुना प्रयुवती गच्छतीति
वा प्रवियुतं गच्छतीति वा सरस्वती सर इत्युदकनाम सर्तेस्तद्व
ती शुतुद्री शुद्राविणी क्षिप्रद्राविण्याशु तुन्नेव द्रवतीति इरावतीं
परुष्णीत्याहुः पर्ववती कुटिलगामिन्यसिक्न्यशुक्लासितासित

Digitized by Vaidika Bharata/Suparna Trust, Maujpur, New Delhi.

Takshashila Project

२१ मितिवर्णनामतत्प्रतिषेधोसितंमरुद्वृधः सर्वानद्योमरुतः
एनावर्द्धयंतिवितस्ताविदग्धाविवृद्धामहाकूलाजीकीयांविपा
डित्याहुर्ऋजीकप्रभवावाऋजुगामिनीवाविपाड्विपाटनाद्वावि
पाशनाद्वाविप्रापणाद्वापाशाऽअस्यांव्यपाश्यंतवसिष्ठस्य
मुमूर्षतस्तस्माद्विपाडुच्यतेपूर्वमासीदुरुंजिरासुषोमासिंधु
र्यदेनामभिप्रसुवंतिनद्यः सिंधुःस्यंदनादापऽआप्नोतेस्तासा
मेषाभवति॥५॥२६॥आपोहिष्ठामयोभुवस्तानऽऊर्जेदधातन २१
नामहेरणायचक्षसे॥आपोहिस्थसुखभुवस्तानोन्नायधत्त
स्ता।

महतेचनोरणायरमणीयायदर्शनीयायोषधयऽओषंधयं
तीतिवोषत्येनाधयंतीतिवादोषंधयंतीतिवातासामेषाभ
वति॥६॥२७॥याऽओषधीःपूर्वाजातादेवेभ्यस्त्रियुगंपुरा॥मनै
नुबभ्रूणामहंशतंधामानिसप्तच॥याऽओषधयःपूर्वाजातादे
वेभ्यस्त्रीणियुगानिपुरामन्येनुतद्बभ्रूणामहंबभ्रुवर्णानांभ
रणानांहरणानामितिवाशतंधामानिसप्तचेधामानित्रयाणि
भवंतिस्थानानिनामानिजन्मानीतिस्थानान्यत्राभिप्रेतानि
सप्तशतंपुरुषस्यमर्मणांतेष्वेनादधतीतिवारात्रिर्व्याख्याता

Digitized by Vaidika Bharata/Suparna Trust, Maujpur, New Delhi.

२८ तस्याः एषा भवति ॥ ७ ॥ २८ ॥ आ रात्रि पार्थिवं रजः पितुरप्रायि धा
मभिः । दिवः सदांसि बृहती वि तिष्ठस आ त्वेषं वर्त्तते तमः ॥ आ ते ३१
पूपुरस्त्वं रात्रि पार्थिवं रजः स्थानैर्मध्यमस्य दिवः सदांसि बृहती
महती वितिष्ठस आवर्त्तते त्वेषं तमो रजोऽरण्यान्यरण्यस्य प
त्न्यरण्यमपार्णं ग्रामाद्रमणं भवतीति वा तस्याः एषा भवति ।
॥ ८ ॥ २९ ॥ अरण्यान्यरण्यान्यसौ या प्रेव नश्यसि । कथा ग्रामं न पृच्छ
सि न त्वा भीरिव विंदती३ँ ॥ अरण्यानीत्येनामामंत्रयते यासावर २९
ण्यानि वनानि पराचीव नश्यसि कथं ग्रामं न पृच्छसि न त्वा भीर्विं

दतीवेतीवः परिद्यार्थे वा श्रद्धा श्रद्धानात्तस्याः एषा भवति ॥ ९ ॥
३० ॥ श्रद्धयाग्निः समिध्यते श्रद्धया हूयते हविः ॥ श्रद्धां भगस्य मूर्द्ध
नि वचसा वेदयामसि ॥ श्रद्धयाग्निः साधु समिध्यते श्रद्धया हविः
साधु हूयते श्रद्धां भगस्य भागधेयस्य मूर्द्धनि प्रधानांगे वचनेना
वेदयामः पृथिवी प्रथनात्तस्याः एषा भवति ॥ १० ॥ ३१ ॥ स्यो
ना पृथिवि भवानृक्षरा निवेशनी ॥ यच्छा नः शर्म सप्रथः ॥ सुखा
नः पृथिवि भवानृक्षरा निवेशन्यृक्षरः कंटक ऋच्छतेः कंटकः कं ७ २
तपो वा कृंततेर्वा कंटतेर्वा स्याद्गतिकर्मणः उद्गततरो भवति

३९ यच्छ नः शर्म यच्छ तु शरणं सर्वतः पृथुप्रख्याख्याता तस्याः एषा
भवति ॥११॥ ३२॥ अमीषां चित्तं प्रतिलोभयन्ती गृहाणांगान्यप्वे
परेहि ॥ अभिप्रेहि निर्दह हृत्सु शोकैरंधेनामित्रास्तमसा सचं-
तां॥ अमीषां चित्तानि प्रतिलोभयमाना गृहाणांगान्यप्वे परेहि।
अभिप्रेहि निर्दह हृदयानि शोकैरंधेनामित्रास्तमसा संसेव्यं-
तामग्नाय्यग्नेः पत्नी तस्याः एषा भवति ॥१२॥ ३३॥ इहेंद्राणीमु-
पह्वये वरुणानीं स्वस्तये। अग्नायीं सोमपीतये॥ इति सा निग- ३९
दव्याख्याता ॥१३॥ ३४॥ नवमस्य तृतीयः पादः॥ ॥ ॥ अथातो

स रं

शौ हैंद्रानुक्रमसे व्याख्यातं मुपैस्तं मुक्तं सलैत तयोरेषा भवति॥
॥१॥ ३५॥ आयजी वाजसातमा ता ह्युच्चा विजर्भृतः॥ हरी इवांधां-
सि बप्सता॥ आयष्टव्ये अन्नानां संभक्ततमे ते ह्युच्चैर्विह्रिये-
ते हरी इवांधांसि भुंजाने हविर्द्धाने हविर्हविर्धानेति धानेत यो-
रेषा भवति॥२॥ ३६॥ आ वामुपस्थमद्रुहा देवाः सीदंतु यज्ञियाः।
इहाद्य सोमपीतये॥ आसीदंतु वामुपस्थ उपस्थानं यज्ञिया दे-
वा यज्ञसंपादिनः इहाद्य सोमपानाय द्यावापृथिव्यौ व्याख्या-
ते तयोरेषा भवति॥३॥ ३७॥ द्यावा नः पृथिवी इमं सिध्रमद्य

४७ दिविस्पृशं। यज्ञं देवेषु यच्छतं। द्यावापृथिव्यौ न ऽइमं साधनमद्य
दिविस्पृशं यज्ञं देवेषु नियच्छतं। विपाट्छुतुद्र्यौ व्याख्याते तयो
रेषा भवति॥४॥३९॥ प्र पर्वतानामुशती उपस्थादश्वे ऽइव वि
षिते हासमाने। गावेव शुभ्रे मातरा रिहाणे विपाट्छुतुद्री पय
सा जवेते॥ पर्वतानामुपस्थादुपस्थानादुशत्यौ कामयमाने अ
श्वे ऽइव विमुक्ते ऽइति वा विषण्णे ऽइति वा हासमाने हासतिः स्प
र्धायां हर्षमाणे वा गावाविव शुभ्रे संमातरौ रिहाणे विपाट्छुतु ४७
द्री पयसा प्रजवेते ऽआर्त्नी ऽअर्त्न्यौ वा अरण्यौ वा अरिषण्यौ वा तयोरे

नै २

षा भवति॥५॥४०॥ ते ऽआचरन्ती समनेव योषा मातेव पुत्रं
बिभृतामुपस्थे। अप शत्रून्विध्यतां संविदाने ऽआर्त्नी ऽइमे वि
२६३ ष्फुरन्ती ऽअमित्रान्॥ ते ऽआचरन्त्यौ समनसाविव योषे माते
व पुत्रं बिभृतामुपस्थ ऽउपस्थाने पशत्रून्विध्यतां संविदाने
आर्त्न्याविमे विघ्नत्याविमित्रान्। शुनासीरौ शुनो वायुः शु एत्यन्त
रिक्षे सीर ऽआदित्यः सरणात्तयोरेषा भवति॥६॥४१॥ शुनासी
राविमां वाचं जुषेथां यद्दिवि चक्रथुः पयः। तेनेमामुपसिं
चतं॥ इति सा निगदव्याख्याता। देवीजोष्ट्री देव्यौ जोषयित्र्यौ

Digitized by Vaidika Bharata/Suparna Trust, Maujpur, New Delhi.

Takshashila Project

४२ द्यावापृथिव्याविति वाहोरात्रे ऽ इति वा सस्यं च समानेति कांड
कारस्तयोरेषसंप्रैषो भवति ॥७॥ ष्टु ॥ देवीजोष्ट्री वसुधितीय
योरन्या घाद्द्वेषांसि ॥ यूयवदन्या वक्षद्वसु वार्याणि यजमाना
य वसुवने वसुधेयस्य वीतां यज ॥ देवीजोष्ट्री देव्यौजोष्ट्यि
ष्ट्यौ वसुधात्यौ ययोरन्याघानि द्वेषांस्ययवयावद्यस्यावक्षद्वन्या
वसूनि वननीयानि यजमानाय वसुवननाय च वसुधाना
य च वीतां पिबेतां कामयेतां वा यजेति संप्रैषो देवी ऊर्ज्जाहुती ४२
देव्या ऽ ऊर्ज्जाहुत्यौ द्यावापृथिव्याविति वाहोरात्रे ऽ इति वा सस्यं

च समा चेति कांडकारस्तयोरेषसंप्रैषो भवति ॥८॥ ष्टु ॥ देवी ऽ
ऊर्ज्जाहुती ऽ इषमूर्जमन्या वक्षत्सग्धिं सपीतिमन्या नवेन पूर्वं द
यमानाः स्याम पुराणेन नवं तामूर्ज्जमूर्ज्जाहुती ऊर्ज्जयमाने ऽ अ
धातां वसुवने वसुधेयस्य वीतां यज ॥ देवी ऊर्ज्जाहुती देव्या ऽ ऊ
र्ज्जाहुत्यावंनं च रसं चावहत्यन्या सहसग्धिं च सहसपीतिं चान्या
नवेन पूर्वं दयमानाः स्याम पुराणेन नवं तामूर्ज्जमूर्ज्जाहुती ऽ ऊ
र्ज्जयमाने ऽ अधातां वसुवननाय च वसुधानाय च वीतां पिबे
तां कामयेतां वा यजेति संप्रैषो यजेति संप्रैषः ॥ ९ ॥ ष्टु ॥ नव

Digitized by Vaidika Bharata/Suparna Trust, Maujpur, New Delhi.

५२ मस्य चतुर्थः पादः॥ ॥इति यास्काचार्ये निरुक्ते नवमोऽध्यायः
समाप्तः॥ ॥हरिः ॐ ॥ अथातो मध्यस्थाना देवतास्तासां वायुः
प्रथमागामी भवति वायुर्वातेर्वेतेर्वा स्याद्गतिकर्मण एतेरि
ति स्थौलाष्ठीविरनर्थको वकारः तस्यैषा भवति॥१॥ वायवा
याहि दर्शतेमे सोमा अरंकृताः॥ तेषां पाहि श्रुधी हवं॥ वायवा
याहि दर्शनीय इमे सोमा अरंकृतास्तेषां पिब शृणु नो ह्वानम्
इति कमन्यं मध्यमादेवमवक्ष्यत्तस्यैषापरा भवति॥२॥ आ ५२
सस्रांसः शवसानमच्छेंद्रं सुचक्रे रथ्यासोऽअश्वाः॥ अभिश्रव ऋ
णा

श्री

ज्यंतो वहेयुर्नू चिन्नु वायोरमृतं विदस्येत्॥ आसस्रवांसोऽभिव
ज्ञायमाना इंद्रं कल्याणचक्रे रथे योगाय रथ्याः रथस्य वोल्हा
रः ऋज्यंत ऋजुगामिनो नमस्निवहेयुर्नवं च पुराणं च यश्च वस्तं
न नाम स्यूयतः इति सतो वायोश्चास्य त्रज्ञो यथा न विदस्येदिती
द्रप्रधानेत्येके नैघंटुकं वायुकर्मोभयप्रधानेत्यपरं वरुणो वृणो
तीति सतस्तस्यैषा भवति॥३॥ नीचीनबारं वरुणः कबंधं प्रसस
र्ज रोदसी अंतरिक्षं तेन विश्वस्य भुवनस्य राजा यवं न वृष्टिर्व्यु
नत्ति भूम॥ नीचीनद्वारं वरुणः कबंधं मेघं कवनमुदकं भवति

Takshashila Project

४२ कमस्मिन्धीयत ऽउदकमपि कबंधमुच्यते बंधिरनिभृतत्वे कम
निभृतं च प्रसृजति द्यावापृथिव्यौ चांतरिक्षं च महत्वेन तेन स
र्वस्य भुवनस्य राजा यवमिव वृष्टिर्भुनत्ति भूमिं तस्यैषा परा भ
वति ॥ ४ ॥ तमूषु समना गिरा पितॄणां च मन्मभिः ॥ नाभाकस्य
प्रशस्तिभिर्यः सिंधूनामुपोदये सप्तस्वसा स मध्यमो नभंतामन्य
के समे ॥ तं स्वचित्रेष्टौ मि समानया गिरा गीत्या स्तुत्या पितॄणां च मन
नीयैः स्तोमैर्नाभाकस्य प्रशस्तिभिः ऋषिर्नाभाको बभूव यः स्यंद ४२
नानामासामपामुपोदये सप्तस्वसारमेनमाह वाग्भिः स मध्य

मः इति निरुच्यते ऽथैष ऽएव नुति ॥ नभंतामन्यके समे ॥ मा भूवं
नन्यके सर्वे ये नो द्विषंति दुर्धियः पापधियः पापसंकल्पा रुद्रो रौ
तीति सतो रोरूयमाणो द्रवतीति वा रोदयतेर्वा यदरुदत्तद्रुद्रस्य
रुद्रत्वमिति काठकं यदरोदीत्तद्रुद्रस्य रुद्रत्वमिति हारिद्रविकं त
स्यैषा भवति ॥ ५ ॥ इमा रुद्राय स्थिरधन्वने गिरः क्षिप्रेषवे देवा
य स्वधाम्ने । अषाळ्हाय सहमानाय वेधसे तिग्मायुधाय भर
ता शृणोतु नः ॥ इमा रुद्राय दृढधन्वने गिरः क्षिप्रेषवे देवाया
न्नवते ऽषाळ्हायान्यैः सहमानाय विधात्रे तिग्मायुधाय भरत

Digitized by Vaidika Bharata/Suparna Trust, Maujpur, New Delhi.

Takshashila Project

४४ शृणोतु नः स्तिग्मं तेजतेरुत्साहकर्मणः आयुधमायोधनात्तस्यै
षा भवति ॥ ६ ॥ या ते दिद्युदवसृष्टा दिवस्परि क्ष्मया चरति परि सा
वृणक्तु नः । सहस्रं ते स्वपिवात भेषजा मा नस्तोकेषु तनयेषु री
रिषः ॥ या ते दिद्युदवसृष्टा दिवस्परि दिवोऽधि दिद्युद्द्यतेर्वा द्युते
र्वा क्ष्मया चरति क्ष्मा पृथिवी तस्यां चरति तया चरति विक्ष्मा
पयति चरतीति वा परि वृणक्तु नः सा सहस्रं ते स्वाप्तवचन
भेषज्यानि मा नः स्त्वं पुत्रेषु पौत्रेषु च रीरिषः तोकं तुद्यतेस्तन ४४
यं तनोतेरग्निरपि रुद्र उच्यते तस्यैषा भवति ॥ ७ ॥ जराबोध

तद्विविड्ढि विशेविशे यज्ञियाय । स्तोमं रुद्राय दृशीकं ॥ जरा स्तुति
र्जरतेः स्तुतिकर्मणः तां बोध तया बोधयितरिति वा तद्विविड्ढि
तत्कुरु मनुष्यस्य मनुष्यस्य यजनाय स्तोमं रुद्राय दर्शनीयमिं
द्र इरां दृणातीति वेरां ददातीति वेरां दधातीति वेरां दारयत इति
वेरां धारयत इति वेन्दवे द्रवत इति वेन्दौ रमत इति वेन्धे भूतानी
ति वा तद्यदेनं प्राणैः समैन्धत तदिन्द्रस्येन्द्रत्वमिति विज्ञायत इ
दं करणादित्याग्रायण इदं दर्शनादित्यौपमन्यवः इंदतेर्वैश्व
र्यकर्मणः इंदञ्छत्रूणां दारयिता वा द्रावयिता वादरयिता च यज्व

Digitized by Vaidika Bharata/Suparna Trust, Maujpur, New Delhi.

४५ नांतस्यैषान्नवत्ति॥८॥ अदर्दरुत्समसृजोविखानित्वमर्णवान्ब
द्बधानाँऽअरम्णाः॥ महांतमिंद्रपर्वतंवियद्वः सृजोविधाराऽअवदा
नुवंहन्॥ अदृणाःऽउत्समुत्सऽउत्सदनाद्वेस्यंदनाद्वानयनाद्वाव्य
सृजोस्यखानित्वमर्णवानर्णस्वतएतान्माध्यमकांस्संस्त्यायान्बद्ब
धमानानरम्णारम्णातिः संयमनकर्माविसर्जनकर्मावामहांत
मिंद्रपर्वतंमेघंयद्वृणोः सृजोस्यधाराऽअवाहंनेनंदानकर्मा
णंतस्यैषापरान्नवति॥९॥ योजातऽएवप्रथमोमनस्वांदेवोदे ४५
वान्क्रतुनापर्यभूषत्॥ यस्यशुष्माद्रोदसीऽअभ्यसेतांनृम्णस्य

द्य स

मह्नासजनासऽइंद्रः॥ योजातऽएवप्रथमोमनस्वीदेवोदेवान्क्र
तुनाकर्मणापर्यभवत्पर्यगृह्णात्पर्यरक्षदत्यक्रामदितिवाय
स्यबलाद्यावापृथिव्यावबिभीतांनृम्णस्यमह्नाबलस्यमह
त्वेनसजनासऽइंद्रइत्यृषेर्दृष्टार्थप्रीतिर्भवत्याख्यानसंयुक्ता
पर्जन्यस्तृपेराद्यंतविपरीतस्यतर्पयिताजन्यःपरोजेताजनयि वा
तावाप्रार्जयितावारसानांतस्यैषान्नवति॥१०॥ विवृक्षान्हंतुत
हंतिरक्षसोविश्वंबिभायभुवनंमहावधात्।उतानागाऽईषते
वृष्ण्यावतोयत्पर्जन्यस्तनयन्हंतिदुष्कृतः॥ विहंविवृक्षान्विहंति

चरक्षांसिसर्वाणिचास्माद्भूतानिबिभ्यतिमहावधान्महान्ह्यस्य
वधोप्यनपराधोभीतःपलायतेवर्षकर्मवतोयत्पर्जन्यस्तनय
न्हंतिदुष्कृतःपापकृतोबृहस्पतिर्बृहतःपातावापालयितावात
स्यैषाभवति॥११॥अश्नापिनद्धंमधुपर्यपश्यन्मत्स्यंनदीनऽउद
निक्षियंतं।निर्जभारचमसंनवृक्षाद्बृहस्पतिर्विरवेणाविकृ
त्य॥अशनवतामेघेनापिनद्धंमधुपर्यपश्यन्मत्स्यमिवदीनऽउ
दकेनिवसंतंनिर्जहारतच्चमसमिववृक्षाच्चमसःकस्माच्चमंत्य ४६
स्मिंनितिबृहस्पतिर्विरवेणशब्देनविकृत्यब्रह्मणस्पतिर्ब्रह्मणः
वे

पातावापालयितावातस्यैषाभवति॥१२॥अश्मास्यमवतंब्रह्म
णस्पतिर्मधुधारमभियमोजसातृणत्॥तमेवविश्वेपपिरेस्वर्दृ
शोबहुसाकंसिसिचुरुत्समुद्रिणं॥अश्नानवंतमास्यंदनवंतम
वातितंब्रह्मणस्पतिर्मधुधारमभियमोजसाबलेनाभ्यतृणत्त
मेवसर्वेपिबंतिरश्मयःसूर्यदृशोबहुनेनंसहसिंचंत्युत्समुद्रिण
मुदकवंतं॥१३॥दशमस्यप्रथमःपादः॥ ॥ॐ॥क्षेत्रस्यपतिः।क्षेत्रं
क्षीयतेर्निवासकर्मणस्तस्यपातावापालयितावातस्यैषाभव
ति॥१॥१४॥क्षेत्रस्यपतिनावयंहितेनैवजयामसि।गामश्वंपोष

Takshashila Project

४७ यित्वा स नो मृळातीदृशे॥ क्षेत्रस्य पतिना वयं सुहितेनेव जयामः। गो
गामश्वं पुष्टं पोषयित्न्वाहरेति। स नो मृळातीदृशे। बलेनेवाध
नेन वा मृळयतिरूपदया कर्मपूजा कर्म वा तस्यैषा परा भवति
॥२॥२५॥ क्षेत्रस्य पते मधुमन्तमूर्मिं धेनुरिव पयो अस्मासु धुक्ष्व
मधुश्चुतं घृतमिव सुपूतमृतस्य नः पतयो मृळयन्तु॥ क्षेत्रस्य
पते मधुमन्तमूर्मिं धेनुरिव पयो अस्मासु धुक्ष्वेति मधुश्चुतं घृ
तमिवोदकं सुपूतमृतस्य नः पातारो वा पालयितारो वा मृळ ४७
यंतु मृळतिर्दानकर्मा लघ समानामामृचि समानाभिव्याहारे भ

वति तज्जामि भवतीत्येकं मधुमन्तं मधुश्चुतमिति यथा यदेव
समाने पादे समानाभिव्याहरं भवति तज्जामि भवतीत्यपरं हि
रण्यरूपः स हिरण्यसंदृगिति यथा यथा कथा च विशेषो जामि भ
वतीत्यपरं मंडूका इवोदकान्मंडूका उदकादिवेति यथा॥ वास्तो
ष्पतिः। वास्तु वसतेर्निवासकर्मणस्तस्य पाता वा पालयिता वा त
स्यैषा भवति॥२॥१८॥ अमीवहा वास्तोष्पते विश्वा रूपाण्याविशन्। ष२
सखा सुशेव एधि नः॥ अमीवहा वास्तोष्पते सर्वाणि रूपाण्या
विशन्सखा नः सुसुखो भव त्वं शेव इति सुखनाम। ष्पतेर्व का

Digitized by Vaidika Bharata/Suparna Trust, Maujpur, New Delhi.

७८ रोनामकरणंतस्मात्तरोपलिंगीविजानातितगुलःशिवमित्यपि
स्यन्नुवति॥यद्यद्रूपंकामयतेतत्तद्देवताभव[redacted]ति॥रूपं
रूपंमघवाबोभवीतीत्यपिनिगमोभवति॥वाचस्पतिर्वाचः
